# धेनुः

धेनुः ग्राम्यः पशुः। धेनुः मधुरं दुग्धं ददाति। सा धान्यं, तृणं घासं च भक्षयति। धेनोः दुग्धं दधि भवति।

दधि मथित्वा तक्रं साधयन्ति। दध्नः नवनीतं जायते।

नवनीतात् घृतं भवति। धेनोः क्षीरं, दधि, तक्रं, घृतं च पथ्यानि भ वन्ति। भारतदेशे जनैः धेनुः पूज्यते।

धेनोः द्वे शृङ्गे वर्तेते। तस्याः एकं दीर्घं पुच्छं अस्ति। तस्याः चत्वारः पादाः सन्ति। धेनवः शुक्लाः, श्यामाः, रभाश्च भवन्ति।

शिशवः रुग्णाश्च धेनुदुग्धं पिबन्ति। धेनोः परिपालनं क्षेमाय भवति।